# संस्कृत भाषा परिचयः

# An Introduction to Sanskrit : Unit – VII

**M. R. Dwarakanath**

१) श्लोक **(Sloka)**

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥

पदच्छेद **(Word decomposition)**

ऊर्ध्व–मूलम् अधःशाखम् अश्वत्थं प्र–आहुः अव्ययम् ।
छन्दांसि यस्य पर्णानि यः तं वेद सः वेदवित् ॥

अर्थ **(Meaning)**

The imperishable (अव्ययं) Aswatha tree (अश्वत्थं) has roots above (ऊर्ध्व–मूलं) and branches below (अधःशाखं) । Whose (यस्य) leaves (पर्णानि) they say (प्र–आहुः) are the Vedas (छन्दांसि) । Who (यः) knows (वेद) that (तं), he (सः) is a knower of Vedas (वेदवित्) ।

व्याकरण प्रकरणम् **(Grammar)**

Here we have a relative clause यः तं (यस्य पर्णानि छन्दांसि इति) वेत्ति । This clause is resolved by सः वेदवित् । यस्य itself a relative resolved by अश्वत्थ etc.

(२) शब्द कोशः **(Vocabulary)**

२–अ) सुबन्ताः **(Nouns, Adjectives, etc.)**

| | | | |
|---|---|---|---|
| कबरी | Braid | गात्र | Limb |
| कक्ष | Arm-pit | वक्षस् | Chest |
| तालु | Palate | अनः | Breath |
| अध्यापक | Teacher | कुम्भकार | Potter |
| कृषीवल | Farmer | क्षेत्रपाल | Landlord |
| पितामहः | p.g.father | पितामही | p.g.mother |
| मातामहः | m.g.father | मातामही | m.g.mother |
| पितृव्यः | p.uncle | मातुलः | m.uncle |
| शल्यः | Porcupine | किरिः | Boar |
| कुक्कुटः | Fowl | छागः | Goat |
| तूलं | Cotton | क्षौमं | Silk |
| ऊर्णा | Wool | वल्कलः | Bark |
| गोधुम | Wheat | मुद्गः | Greengram |
| वासस् | Garment | उपानह् | Sandal |
| कज्जलं | Mascara | भूषणं | Ornament |
| गभीर | Deep | गाध | Shallow |
| दर्पः | Pride | दर्पणः | Mirror |
| धृतिः | Firmness | शैथिल्य | Laxity |

२–इ) तिङन्ताः **(Verbs)** : The roots and (stems) of more Sanskrit verbs:

| | | | |
|---|---|---|---|
| क्षर् (क्षर) | flow | घ्रा (जिघ्र) | smell |
| दंश् (दश) | bite | याच् (याच) | beg |
| वप् (वप) | sow | शप् (शप) | curse |
| विद् (विन्द) | get | सृज् (सृज) | create |
| विद् (विद्य) | to be | शुष् (शुष्य) | dry |
| श्रम् (श्रिम्य) | tire | पीड् (पीडय) | bother |
| मान् (मानय) | respect | मार्ग् (मार्गय) | seek |
| गुण् (गुणय) | multiply | सूच् (सूचय) | indicate |
| द्विष् (द्विष्) | hate | ब्रु (ब्रु) | speak |
| स्तु (स्तु) | praise | शी (शी) | sleep |
| पृ (पिपृ) | fill | हा (जहा) | leave |
| स्तृ (स्तृणु) | scatter | चि (चिनु) | collect |
| अश् (अशनु) | reach | पिष् (पिनष्) | grind |
| भुज् (भुनज्) | enjoy | युज् (युनज्) | unite |
| अश् (अश्ना) | eat | क्री (क्रीणा) | buy |

२–उ) अव्ययपदानि **(Indeclinables)**

| | | | |
|---|---|---|---|
| अजस्रं | always | अथवा | or |
| अन्यथा | otherwise | इत्थं | thus |
| इदानीं | now | एतर्हि | now |
| केवलं | only | तु | but |
| पुनः | again | प्रभृति | since |
| प्रायः | mostly | बहुधा | variously |
| बाढं | certainly | भूयः | abundant |

| | | | |
|---|---|---|---|
| यत:<br>सम्यक् | since<br>properly | मृषा<br>स्वयं | false<br>self |

३ क्, य्, त् अव्यया: च सर्वनामा:

| क् | य् | त् | क् | य् | त् |
|---|---|---|---|---|---|
| कदा | यदा | तदा | क: | य: | स: |
| कुत्र | यत्र | तत्र | का | या | सा |
| कुत: | यत: | तत: | किं | यत् | तत् |
| कथं | यथा | तथा | केन | येन | तेन |
| | यदि | तर्हि | कया | यया | तया |
| | यावत् | तावत् | कस्य | यस्य | तस्य |

The above table lists a triad of words that are closely related; they are the interrogative, relative and correlative. This grouping comes in very handy in expressing more complex ideas in sentences with a subordinate and principal clauses. The interrogative is used to question, the relative is used to pose a hypothetical or rhetorical, and the correlative is used to resolve the question. It also includes an 'if-then' and 'as long as - so long' constructs. Some examples - (the finite verb is implied:)

| | |
|---|---|
| य: मनति स: मुनि: । | He who thinks, is a sage. |
| यदा सुवृष्टि: तदा सुभिक्षम् । | When it rains well, then food is plenty. |
| यथा राजा तथा प्रजा । | Like king, like subjects. |
| यत्र धूम: तत्र वह्नि: । | Where there is smoke, there is fire. |
| यत: प्रयत्नं तत: फलं । | As the effort, so the reward. |
| या ह्य: अपश्यं का सा । | Who (the one) I saw yesterday, who is she? |
| यावत् दुराचार: तावत् दुर्भिक्षम् । | As long as there is bad conduct, so long famine. |
| यदि मनसि तर्हि अवगच्छसि । | If you think, then you understand. |
| यत्र यत्र कृष्ण: तत्र पार्थ: । | Wherever is Krishna, there is Arjuna. |
| यदा यदा आलस: तदा तामस: | Whenever there is laziness, there is darkness. |

## ४ प्रयोगा: **Voices**

### ४-१ भावे प्रयोग:

This voice is called impersonal and is exclusively used in conjunction with intransitive verbs. Here no direct object is possible; otherwise it is identical with कर्मणि । Since there is no direct object, the verb has no reference for agreement and thus, the verb is always placed in प्रथम पुरुष एक वचन । Translation into English of this usage could be highly convoluted!

शिशु: रोदति । शिशुना रुद्यते ।

एका स्त्री अस्ति । एकया स्त्रिया भूयते ।

पुष्पाणि विकसन्ति । पुष्पै: विकस्यते ।

रामलक्ष्मणौ वने तिष्ठत: । रामलक्ष्मणाभ्यां वने स्थीयते ।

In the past tense, either a finite verb or a past passive participle may be use in the impersonal voice. Again as the pp has no reference for agreement, the pp is always placed in the neuter, nominative, singular.

शिष्य: अतिष्ठत् । शिष्येण स्थीयते ।

शिष्य: स्थितवान् । शिष्येण स्थातम् ।

सा अहसत् । तया अहस्यत । तया हसितम् ।

### ४-२ द्विकर्मक धातव:

In Sanskrit, 16 main verbal roots are regarded as द्विकर्मक - capable of taking two direct objects at the same time. Only one is considered principal (प्रधानकर्म), the other secondary (गौणकर्म) । In the active voice, both objects are in the accusative; however in the passive

voice only one of the direct objects is placed in the nominative while the other remains in the accusative! This is of relatively rare occurence, but mentioned here just as an interesting tidbit.

भिक्षुकौ धनिकं निष्कं याचेते । भिक्षुकाभ्यां धनिकः निष्कं याच्यते ।

### ४ वृत्तयः – Expositions / Glosses
### ४–१ कृद्वृत्ति – Participles etc.
### ६–१–१ त्वान्त, ल्यबन्ताव्यय – Gerund

The gerund in Sanskrit is simply formed by adding the suffix त्वा to the verbal root. If the root has a prefix (उपसर्ग) then the suffix is त्य वा य. Typically, the final nasal is dropped, some consonant ending roots take इ. सम्प्रसा an indeclinable and thus undergoes no changes and there is no issue of agreement! Examples:

गम् – गत्वा । आगम् – आगत्य । पठ् – पठित्वा । वस् – उषित्वा । उपवस् – उपविष्य । युज् – युक्त्वा । दा –दत्त्वा ।

The gerund is used in subordinate clauses when a series of sequential events are to be expressed; the principle caluse will use a finte verb or a participle.

| | |
|---|---|
| सा अवगाहनं कृत्वा देवं पूजयति । | She having taken a bath, worships God. |
| सर्व धर्मान् परित्यज्य मामेव शरणं व्रज । | Having given up all actions, take refuge in me alone. |
| संगीतं श्रुत्वा सर्वे नन्दिताः । | Having heard the music, all rejoiced. |
| अतिथिः मुहूर्तं उपविश्य स्वदेशं प्रत्यगच्छत् । | The guest having seated for a while returned to his city. |

These suffixes are not to be confused with similar sounding suffixes added to nouns to indicate quality (भाव) । मनुष्य – मनुष्यत्व, निपुण – नैपुण्य ।

## ५ तिङन्तप्रकरणम् – Verbs / Conjugation
### ५–१ सार्वधातुकाः च आर्धधातुकाः

We have seen that verbal roots can be classified into three पदाः and into the 10 गणाः । We have also studied two tenses and two moods - लट्, लङ्, लोट् च लिङ् । These 4 tenses / moods use the suffixes विकरणाः to form the verbal stems from the roots. The verbal terminations are added to the stem. Because of this process, these tenses / moods are called सविकरणाः वा सार्वधातुकाः । There are yet 6 (7 when the Vedas are included) other tenses / moods that do not use the विकरणाः । The terminations are added directly to the roots. These are called अविकरणाः वा आर्धधातुकाः । However, there is a little complication! The verbal roots before taking on the terminations corresponding to the tense/mood, person and number may acquire इ । For this purpose the roots are classified as सेट् (स इट्), वेट् (वा इट्), वा अनिट् (न इट्) । The सेट् roots necessarily take इ । The वेट् roots optionally, and the अनिट् roots do not take इ । Here the गणाः go not matter!

### ५–२ सार्वधातुकाः च आर्धधातुकाः नियमाः – Rules

For सार्वधातुकाः tenses / moods the process for forming the finite verb is root - stem - verb. Here we need information about the गण for forming the stem. For instance the stem of the root विद् is विद्, विद्य, विन्द, विन्त् वा वेदय in ganas 2, 4, 6, 7 and 10. The meanings are respectively 2-to know, 4-to be, 6- to gain, 7- to regard and 10-to tell. The padas are different in the various ganas. For आर्धधातुकाः tenses / moods the gana is not relevant but the सेट्, वेट् वा अनिट् distinction is important. Just as a root can be in more than one gana, so too it can be सेट्, वेट् वा अनिट् when the meaning changes.

### ५–३ सामान्यभविष्यत्काले लृट् – Simple Future

The simple or common future uses a tense marker but otherwise the terminations are

exactly the same as in the present tense (लट्) in both पदा: । No complication here! The tense marker is स्य । Let us see how this works.

गम् (सेट्) – गमि + tense marker स्य – गमिष्य । The स् changes to ष् because it is preceeded by इ and the सन्धि rule. In the following examples, the present tense verb is shown in paranthesis for reference.

| | |
|---|---|
| अद्य ग्रामं गमिष्यामि (गच्छामि) । | Today, I will go to the village |
| ते चन्दनं घ्रास्यन्ति (जिघ्रन्ति) । | They will smell sandalpaste |
| युवां तं श्वः द्रक्ष्यथः (पश्यथः) | You two will see him tomorrow |
| विप्रः भषिष्यते (भाषते) । | The brahmin will speak |
| अग्निः तप्स्यते (तपति) । | Fire will heat |

Some of the irregular roots in सार्वधातुकाः become regular in आर्धधातुकाः ।

पा – पिबति – पास्यति । स्था – तिष्ठति – स्थास्यति ।

दृश् – पश्यति – द्रक्ष्यति (दृश् स्यति – द्रश् स्यति) ।

Then again there are irregularities in आर्धधातुकाः ।
वस् – वसति – वत्स्यति । अद् – अत्ति – अत्स्यति ।

**Exercises:**

1. Change the voice in the following sentences:

शम्भुना भूयते । बालकैः क्रीड्यते । परेण हस्यते । हयाः हेषन्ते । कन्ये रमेते । सूर्यः राजति । शिश्यैः आसनेषु उपविष्टम् । दीपाभ्यां ज्वलितम् । वधूभिः उत्थितम् । तरू कम्पितवन्तौ । सा गतवती ॥

2. Change the tense from present to simple future or the other way around.

छात्राः पठन्ति (सेट्) । आवां नमावः (अनिट्) । यूयं भाषेथे (सेट्) । असुराः नक्ष्यन्ति (नशिश्यन्ति) । त्वं कार्यं करिष्यसि । आवां होष्यामः । यूयं अत्स्यन्ति ॥

3. Use the gerund in the following:
सः गृहं गच्छति ततः मातरं नमति । सा मातरं नमति ततः देवं पूजयति । मोहनः उपवनेन आगच्छति ततः पाठान् पठति । मित्रः मां परिष्वजति ततः ग्रामाय अपक्रामति ॥

**Sanskrit Crossword #7**
(One syllable per box)

**Clues Across:**
1 One (fem.)
4 Matted hair
5 Brahma - Four faced
6 One of 8 siddhis
8 Break, fracture
10 Boatman
11 With desire
12 Hundred verses
13 Diamond

**Clues Down:**
2 Crystal
3 The largest number in Sanskrit
4 Community, mankind
6 A leader
7 Maternal grand mother
8 Brightener, publisher
9 Ocean - bearer of gems?

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | २ | ■ | ३ | ■ | ४ | |
| ■ | ५ | | | | | ■ |
| ■ | | ■ | | ■ | | ■ |
| ६ | | ७ | ■ | ८ | | ९ |
| | ■ | १० | | | ■ | |
| ११ | | | ■ | १२ | | |
| | ■ | १३ | | | | |